# Gurukritam Shiva Stotram

# ગુરુકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Gurukritam Shiva Stotram

File name : gurukRRitaMshivastotram.itx

Category : shiva, shivapurANa, gurudev, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | yuddhakhaNDa | adhyAya 13/22-37||

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 10, 2025

*sanskritdocuments.org*

# Gurukritam Shiva Stotram

# ગુરુકૃતં શિવસ્તોત્રમ્

ગુરુરુવાચ ।
નમો દેવાધિદેવાય મહાદેવાય ચાત્મને ।
મહેશ્વરાય પ્રભવે ત્ર્યમ્બકાય કપર્દિને ॥ ૨૨॥

દીનનાથાય વિભવે નમોઽન્ધકનિષૂદિને ।
ત્રિપુરઘ્નાય શર્વાય બ્રહ્મણે પરમેષ્ઠિને ॥ ૨૩॥

વિરૂપાક્ષાય રુદ્રાય બહુરૂપાય શમ્ભવે ।
વિરૂપાયાતિરૂપાય રૂપાતીતાય તે નમઃ ॥ ૨૪॥

યજ્ઞવિધ્વંસકર્ત્રે ચ યજ્ઞાનાં ફલદાયિને ।
નમસ્તે મખરૂપાય પરકર્મપ્રવર્તિને ॥ ૨૫॥

કાલાન્તકાય કાલાય કાલભોગિધરાય ચ ।
નમસ્તે પરમેશાય સર્વત્ર વ્યાપિને નમઃ ॥ ૨૬॥

નમો બ્રહ્મશિરોહન્ત્રે બ્રહ્મચન્દ્રસ્તુતાય ચ ।
બ્રહ્મણ્યાય નમસ્તેઽસ્તુ નમસ્તે પરમાત્મને ॥ ૨૭॥

ત્વમગ્નિરનિલો વ્યોમ ત્વમેવાપો વસુન્ધરા ।
ત્વં સૂર્યશ્ચન્દ્રમા ભાનિ જ્યોતિશ્ચક્રં ત્વમેવ હિ ॥ ૨૮॥

ત્વમેવ વિષ્ણુસ્ત્વં બ્રહ્મા તત્સ્તુતસ્ત્વં પરેશ્વરઃ ।
મુનયઃ સનકાદ્યાસ્ત્વં નારદસ્ત્વં તપોધનઃ ॥ ૨૯॥

ત્વમેવ સર્વલોકેશસ્ત્વમેવ જગદાત્મકઃ ।
સર્વાન્વયસ્સર્વભિન્નસ્ત્વમેવ પ્રકૃતેઃ પરઃ ॥ ૫.૧૩.૩૦॥

ત્વં વૈ સૃજસિ લોકાઙ્શ્ચ રજસા વિધિનામભાક્ ।
સત્ત્વેન હરિરૂપસ્ત્વં સકલં પસિ વૈ જગત્ ॥ ૩૧॥

ત્વમેવાસિ મહાદેવ તમસા હરરૂપધૃક્ ।

લીલયા ભુવનં સર્વં નિખિલં પાઞ્ચભૌતિકમ્ ॥ ૩૨॥

ત્વદ્ધ્યાનબલતસ્સૂર્યસ્તપતે વિશ્વભાવન ।
અમૃતં ચ્યવતે લોકે શશી વાતિ સમીરણઃ ॥ ૩૩॥

ત્વદ્ધ્યાનબલતો મેઘાશ્ચામ્બુ વર્ષન્તિ શઙ્કર ।
ત્વદ્ધ્યાનબલતશ્શક્રસ્ત્રિલોકીં પાતિ પુત્રવત્ ॥ ૩૪॥

ત્વદ્ધ્યાનબલતો મેઘાઃ સર્વે દેવા મુનીશ્વરાઃ ।
સ્વાધિકારં ચ કુર્વન્તિ ચકિતા ભવતો ભયાત્ ॥ ૩૫॥

ત્વત્પાદકમલસ્યૈવ સેવનાદ્ભુવિ માનવાઃ ।
નાદ્રિયન્તે સુરાન્ રુદ્ર લોકૈશ્વર્યં ચ ભુઞ્જતે ॥ ૩૬॥

ત્વત્પાદકમલસ્યૈવ સેવનાદગમન્પરામ્ ।
ગતિં યોગધના નામાપ્યગમ્યાં સર્વદુર્લભામ્ ॥ ૩૭॥

ઇતિ શિવપુરાણે રુદ્રસંહિતાયાં યુદ્ધખણ્ડે
ત્રયોદશાધ્યાયાન્તર્ગતં ગુરુકૃતં શિવસ્તોત્રં
સમાપ્તમ્ ।

શિવપુરાણ । રુદ્રસંહિતા । યુદ્ધખણ્ડ । અધ્યાય ૧૩/૨૨-૩૭॥

shivapurANa . rudrasaMhitA . yuddhakhaNDa . adhyAya 13/22-37..

Proofread by PSA Easwaran

*Gurukritam Shiva Stotram*

pdf was typeset on February 10, 2025

Please send corrections to *sanskrit@cheerful.com*